CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विद्याविलास ग्रन्थमालायाः पञ्चविंशतितमं (२५) पुष्पम् ।

अथ

नारायणबलिप्रयोगः

'सर्वप्रायश्चित्त' नामकपरिशिष्टविभूषितः

'विष्णुप्रिया' हिन्दीटीकोपेतश्च

सम्पादकः—

श्री पण्डित तेजोभानु शर्मा

पं० प्रेम दत्त शास्त्री
जहांगीराबाद २०२३६४
बुलन्दशहर (उ. प्र.)

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी

(पुनर्मुद्रणादिकाः सर्वेऽधिकाराः प्रकाशकाधीनाः)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विद्याविलास ग्रन्थमालायाः पञ्चविंशतितमं (२५) पुष्पम् ।

अथ

नारायणबलिप्रयोगः

'विष्णुप्रिया' हिन्दीटीकासहितः

सम्पादकः—

श्री पण्डित तेजोभानु शर्मा

(कर्मकाण्ड-भास्कर, कविरत्न)

पं० प्रेम दत्त शास्त्री
जहांगीराबाद २. २. ७८
बुलन्दशहर (उ.प्र.)

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी

तृतीयावृत्तिः] मूल्यं १–२५ [ई० १९७९

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भूमिका

यह बात तो किसी भी सनातनधर्मी से छिपी नहीं है कि नारायणबलि मृत-प्राणिमात्र के लिए अवश्यकर्त्तव्य कर्म है जो कि चिरकाल से मृतपितर के उद्धार के लिये प्रचलित है, परन्तु इसमें भी देश-विदेश की प्रथा, शैली भिन्न-भिन्न देखी जाती है। बम्बई की ओर, उत्तरप्रदेश की ओर, तथा पञ्जाब की ओर। अब तक बम्बई का नारायणबलिप्रयोग मिलता था किन्तु बम्बई, यू० पी० आदि के ढंग पर बना हुआ, पंजाब के ढंग पर बना हुआ नहीं था जिसके कारण यहाँ की प्रथा के अनुसार कर्म कराने में पण्डितों को बड़ी कठिनता होती थी और वे पण्डित तेजोभानु जी से प्रार्थना करते थे कि यहाँ के ढंग पर इसे बनाने का कष्ट करें। इस प्रार्थना को स्वीकार कर पं० तेजोभानु जी ने बड़े परिश्रम से तथा पंजाब-प्रथा को मद्दे नज़र रखकर यह नारायणबलि-प्रयोग नामक पुस्तक दालभ्य-कृत धर्मशास्त्र से संग्रह कर प्रकट की है, अतः आशा है, धर्मप्रेमी सज्जन इससे लाभ उठाकर सम्पादक के परिश्रम को सफल करेंगे।

निवेदक—

स्नातक : ऋषिकुल, हरिद्वार।
लक्ष्मीनारायण शास्त्री विद्याभास्कर

वि० सं० २०२०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पं० प्रेम ... शास्त्री
जहांगीराबाद २०२३६४
बुलन्दशहर (उ०प्र०)

॥ श्रीगणेशाय नमः ॥

अथ नारायणबलिप्रयोगः

तत्रादौ गणेशादीन् सूर्यादिनवग्रहांश्च संस्थाप्य गौतमादीन् सप्तर्षीन् स्थापयेत्। ततो ब्राह्मणोच्चारितस्वस्त्ययनानंतरं प्रतिज्ञासंकल्पं कुर्यात्, तद्यथा—ॐतत्सद् मासपक्षाद्युच्चार्य अमुक-गोत्रनामाऽहं अमुकगोत्रस्य पितुरमुकप्रेतस्य कुत्सितमृत्युजन्यदोषनिवारणार्थं सद्गतिप्राप्तये तत्सं-बंधिपुत्रादिजनाऽधिकरणकाऽशुभफलनिवारणोत्तरशुभफलप्राप्त्यर्थं च कर्तव्यनारायणबलिकर्माऽहं करिष्ये तदंगत्वेनादौ गणेशादीन्नवग्रहादीन् स्वैर्मन्त्रैरहं पूजयिष्ये।

श्रीगणेशाय नमः॥ सर्वप्रथम गणेशादि तथा सूर्यादि नवग्रहों की तत्पश्चात् गौतमादि सप्तर्षियों की यथाक्रम से स्थापना करें तदुत्तर ब्राह्मणों द्वारा स्वस्तिवाचन करवाकर 'ॐ तत्सत्' इत्यादि से प्रतिज्ञा संकल्प करे।

पूजनानंतरं सप्तर्षीन् पूजयेत्—तद्यथा—समूलाग्रान् कुशान् गृहीत्वा ब्रह्मग्रंथिसमन्वितान् स्थापयित्वा स्वच्छे आसने ऋषीनावाहयेत्, तथा च ते ऋषयः—गौतमोऽत्रिर्भरद्वाजो विश्वा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मित्रोऽथ कश्यपः । वशिष्ठोऽरुंधतीसहितो जमदग्निः प्रपूजिताः ॥१॥ कश्यपोऽत्रिर्वसिष्ठश्च विश्वामित्रोऽथ गौतमः । जमदग्निर्भरद्वाजः सप्तर्षीन्नामतः क्रमात् ॥ इति चात्र गौतमः १ भरद्वाजः २ विश्वामित्रः ३ जमदग्निः ४ अरुंधतीसहितो वसिष्ठः ५ कश्यपः ६ अत्रिः ७ इति क्रमः ।

गणेश—नवग्रहादि पूजा के बाद सप्तर्षियों की पूजा इस प्रकार करें—ब्रह्मग्रंथि से युक्त समूल कुशाओं को स्थापित करके पवित्र आसन पर सातों ऋषियों का आवाहन करें। सात ऋषि ये हैं—१. गौतम, २. भरद्वाज, ३. विश्वामित्र, ४. जमदग्नि, ५. अरुन्धती सहित वसिष्ठ, ६. कश्यप ७. अत्रि।

एषां स्थापने मंत्रौ—ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पाꣳसुरे ॥ १ ॥ ॐ इरावती धेनुमती हि भूतꣳसुयवसिनी मनवे दशस्या व्यस्कभ्ना रोदसी । विष्णुवेतें दाधर्थ पृथिवीमभितो मयूखैः स्वाहा ॥ २ ॥ इति मंत्राभ्यां गौतमादि-सप्तर्षीन् प्राङ्मुखान् स्थापयेत् इति ॥ ॐमनोजूतिर्जुषतामिति मंत्रेण प्रतिष्ठां कुर्यात् । आवाहनमंत्रः—ॐ सप्तऋषयः प्रतिहिताः शरीरे सप्त रक्षंति सदय प्रसादं सप्ताय स्वपतो लोकमीयुस्तत्र जाग्रतो अस्वप्नजौ सत्रसदौ च दैवौ । इत्यावाह्य—

'ॐ इदं विष्णुर्विचक्रमे' इत्यादि दोनों मंत्रों से गौतमादि सातों ऋषियों को पूर्वाभिमुख करके स्थापित करें। तदूत्तर 'ॐ मनोजूतिर्जुषता' इत्यादि मंत्र से प्राणप्रतिष्ठा करके 'ॐ सप्तऋषयः' इत्यादि मंत्र से आवाहन करें।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ततः पूजा—ॐ आगच्छन्तु महाभागाश्चतुर्वेदस्वरूपिणः। यावत्पूजामहं कुर्वे संतु सन्निहिता मम ॥ इत्यावाहनम् ॐ पूर्त्तिं ब्रह्मण्यदेवस्य ब्रह्मणस्तेजसोत्तमम्। कोटिसूर्यप्रतीकाशमृषिवृन्दं नमाम्यहम् ॥ ध्यानम्। ॐ पुराणपुरुषेभ्यो हि देवर्षिभ्यो नमो नमः। ऋग्यजुः सामवेदानां स्वरूपेभ्यो नमोनमः ॥ इति पुष्पासनम्। ॐ गंधपुष्पाक्षतैर्युक्तं पाद्यं गृह्णंतु मे द्विजाः। प्रसादं कुरुत प्रज्ञास्तुष्टाः संतु सदा मम ॥ इतिपाद्यम् ॥ ॐ श्रावण्यां पूर्णिमायां तु अर्चिता ऋषिसत्तमाः। अद्य मे दीयतां सर्वमर्घ्यं गृह्णीत वो नमः ॥ इत्यर्घ्यम्। ॐ लोकानां तुष्टिकर्तारो यूयं सर्वे तपोधनाः। नमो धर्मविधिज्ञेभ्य आचमनं प्रतिगृह्यताम् ॥ इत्याचमनीयम्। ॐ मंदाकिनी गौतमी च यमुना च सरस्वती। स्नानार्थं नर्मदा तापी ताभ्यस्तोयं मया हृतम् ॥ पवित्रं सर्वतीर्थेभ्यः शीतलं निर्मलं जलम्। शक्त्या भक्त्येरितं विप्राः स्नानीयं प्रतिगृह्यताम् ॥ इति स्नानम्। ॐ पयः पृथिव्यां इत्यादिभिः पंचमंत्रैः पंचामृतस्नानम्। ॐ वरुणस्योत्तंभनमसि इति मंत्रेण शुद्धस्नानं कारयित्वा पुरुषसूक्तेन स्नापयेत्।

आवाहन के पश्चात् पूजन प्रारम्भ करें। ॐ आगच्छन्तु महाभागाः' से आवाहन, 'पूर्तिं ब्रह्मण्य' से ध्यान, 'पुराणपुरुषेभ्यो' से पुष्पासन, 'गन्धपुष्पाक्षतैः' से पाद्य, 'श्रावण्यां' से अर्घ्य, 'लोकानां' से आचमनीय, 'मन्दाकिनी' से स्नान, 'पयः पृथिव्यां' इत्यादि पाँच मंत्रों से स्नान कराकर पुरुषसूक्तों से स्नपन करें।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सर्वे नित्यं तपोनिष्ठा ब्रह्मज्ञाः सत्यवादिनः । वस्त्राणि प्रतिगृह्णंतु भूतिदाः संतु मे सदा ॥ इति वस्त्राणि । ॐ यज्ञोपवीतं परमं पवित्रं इति मंत्रेण यज्ञोपवीतम् । ॐ कुंकुमागुरुकस्तूरीसुगंधैर्मिश्रितं शुभम् । गंधाढ्यं चंदनं दिव्यं गृह्णंतु ऋषिसत्तमाः ॥ इति गंधः । ॐअर्चितान् कुंकुमौघेन अक्षतांस्तु सुशोभनान् । गृह्णंतु मम संतुष्टाः प्रसन्ना ऋषिपुंगवाः ॥ इत्यक्षताः । मालतीचंपकादीनि शतपत्रांबुजानि च । मयाहृतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम् ॥ इति पुष्पाणि । ॐ वनस्पतिरसोद्भूतो गंधाढ्यः सुमनोहरः । आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥ इति धूपः । ॐ आज्यं च वर्त्तिसंयुक्तं वह्निना योजितं मया । अहो ऋषिवरा यूयं दीपं गृह्णन्तु कांतिदाः ॥इति दीपः ।

'ॐ सर्वे नित्यं' से वस्त्र, यज्ञोपवीतं' से जनेऊ, 'कुंकुमागुरु'से चन्दन, 'अर्चितान्' से अक्षत, 'मालतीचम्पकादीनि' से पुष्प, 'वनस्पतिरसोद्भूतं' से धूप तथा 'आज्यं' च वर्ति' से दीपदान करें।

ॐ नानापक्वान्नसंयुक्तं रसैः षड्भिश्च संयुतम् । नैवेद्यमृषयः सर्वे गृह्णन्तु शुभदायिकाः॥ इति नैवेद्यम् ॥ॐपूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् । कर्पूरेण समायुक्तं तांबूलं प्रतिगृह्यताम् ॥ इति तांबूलम् । ॐ इदं फलं मया देव स्थापितं पुरतस्तव । तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि॥ इति श्रीफलम् ॥ ॐ हिरण्यगर्भः समवर्त्तताग्रे इति दक्षिणामंत्रः ॥ यानि कानि च पापानि जन्मान्तरकृतानि च । इति प्रदक्षिणामन्त्रः ॥ ॐएते सप्तर्षयः सर्वे भक्त्या संपूजिता मया । सर्वं पापं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

व्यपोहन्तु ज्ञानतोऽज्ञानतः कृतम् ॥ इति नमस्कारः ॥ ॐ न्यूनातिरिक्तकर्माणि मया यानि कृतानि च । क्षम्यंतां तानि सर्वाणि सर्वे यूयं तपोधनाः ॥ इति क्षमापनम् ।

ॐ नानापकान्नसंयुक्तं' से नैवेद्य, 'पूगीफलं महद्दिव्यं' से पान, 'इदं फलं मया देव' से श्रीफल, 'हिरण्यगर्भः' से दक्षिणाद्रव्य, 'यानि कानि च' से प्रदक्षिणा 'एते सप्तर्षयः' से नमस्कार तथा 'न्यूनातिरिक्त-कर्माणि' से क्षमा-प्रार्थना करें।

ततः पूजानंतरं गोदानं कार्यम् । अपसव्येन दश पिंडान् दद्यात्, ततः सव्यं कृत्वा पूर्वपश्चिमोत्तरदक्षिणमध्यक्रमेण वेदोक्तमंत्रैः पंचकलशान् संस्थाप्य तद्यथा ॐमही द्यौः पृथिवी च न इमं यज्ञमिमिक्षतां पिपृतान्नो भरीमभिः ॥ इति भूमिस्पर्शनम् ॥ ॐ ओषधयः समवदंत सोमेन सह राज्ञा यस्मै कृणोति ब्राह्मणास्त्वᳬंराजन् पारयामसी । इत्यक्षतान् क्षिपेत् । ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजं होतारं रत्नधातमम् । ॐ ऋग्वेद इहागच्छ । ॐ इषेत्वोर्जे त्वा वायवस्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण आप्यायध्वमघ्न्या इंद्राय भागं प्रजावतीरनमीवा अयक्ष्मा मावस्तेन ईशत माघशᳬंसो ध्रुवा अस्मिन् गोपतौ स्यात बह्वीर्यजमानस्य पशून् पाहि । ॐयजुर्वेद इहागच्छ । ॐअग्न आयाहि वीतये गृणानो हव्यदातये निहोता सत्सि बर्हिषि । ॐसामवेद इहा-गच्छ । ॐ शन्नोदेवीरभिष्टय आपो भवंतु पीतये शंय्योरभिस्रवंतु नः । ॐ अथर्ववेद इहागच्छ ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ऋषिपूजा के पश्चात् गोदान करें। तत्पश्चात् अपसव्य होकर दस पिण्ड दें। पिण्डदान के बाद पूर्व, पश्चिम, उत्तर, दक्षिण तथा मध्य में वक्ष्यमाण वेदोक्त मंत्रों से पाँच कलशों की स्थापना करें। कलश-स्थापन प्रकार जैसे—'ॐ मही द्यौः' से भूमि का स्पर्श, 'ओषधयः समवदन्त' से अक्षत छिड़क कर चारों वेदों का आवाहन करें। क्रम यथा—-अक्षत लेकर—'ॐ अग्निमीले' ऋग्वेद का, 'इषेत्वोर्जे' से यजुर्वेद का 'अग्न आयाहि' से सामवेद का तथा 'शन्नो देवी' से अथर्ववेद का आवाहन करें।

आजिघ्र कलशं मह्या त्वा विशंत्विंदवः पुनरूर्जा निवर्त्तस्वसानः सहस्रंधुक्ष्वोरुधारा पयस्वती पुनर्माविशताद्रयिः। इति कलशस्थापनम्। ॐ वरुणस्योत्तंभनमसि वरुणस्य स्कंभसर्जनीस्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमासीद। इति जलम्। ॐ अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता गोभाज इत्किलासथ यत्स नवथ पूरुषम्। इत्यश्वत्थपत्रम् ॐ कांडात् कांडात् प्ररोहंति परुषः परुषस्परि एवानो दूर्वे प्रतनु सहस्रेण शतेन च। इति दूर्वा। ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसव इत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। इति कुशपवित्रम्। ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणी बृहस्पतिप्रसूतास्तान्नो मुंचं त्वंहसः। इति पूगीफलम्। ॐ अंबे अंबिके अंबालिके नमानयति कश्चन सस त्यश्वकां सुभद्रिकां कांपीलवासिनीम्। इत्याम्रपत्रम्। गंधपुष्पाणि च तूष्णीं प्रक्षिपेत्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'ॐ आजिघ्र कलशं' से कलश का स्थापन करें। 'वरुणस्योत्तम्भनमसि' से कलश में जल, 'अश्वत्थे वो' से पीपल का पत्ता, 'काण्डात् काण्डात्' से दूर्वा, 'पवित्रेस्थो' से कुशपत्र तथा 'याः फलिनीर्याः' से सुपारी तथा 'अम्बे अम्बिके' से आम का पल्लव कलश पर रखकर उसपर चन्दन-पुष्प विना मन्त्र का (चुपचाप) छोड़ें।

ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत् स दाधार पृथिवीं द्यामुतेमां कस्मै-देवाय हविषा विधेम इति सुवर्णादि पंचरत्नम्। ॐ या औषधी पूर्वे जाता देवेभ्यस्त्रियुगं पुरा मनैनम्यभ्रूणा महंशतंधामानि सप्त च। इति सर्वौषधी। ॐ धान्यमसि धिनुहि देवान् प्राणाय त्वा दानाय त्वा व्यानाय त्वा दीर्घमनुंप्रसितिमायुषेधां देवो वः सविता हिरण्यपाणिः प्रतिगृह्णा-त्वच्छिद्रेण पाणिना चक्षुषे त्वामहीनां पयोसि। इति परितो धान्यप्रक्षेपणम्। ॐसमुद्राय त्वा वाताय स्वाहा अवस्ववे त्वा वाताय स्वाहा शमिदाय त्वा वाताय स्वाहा। इति पुनर्जलदानम्।

'ॐ हिरण्यगर्भः' से पंचरत्न, 'या ओषधी' से सर्वौषधि, 'धान्यमसि' से कलश के चारों ओर धान्य बिखेर कर 'समुद्रायत्वा' से कलश में जल छोड़ें।

ॐ धूरसि धूर्वधूर्वंतं धूर्वतं योऽस्मान् धूर्वति तं धूर्वयं वयं धूर्वामः देवानामसि वह्नि तमꣳ सस्नितमं पप्रितमं जुष्टतमं देवहूतमम्। इति धूपम्। ॐअग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा ज्योतिः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सूर्यः सूर्यो ज्योतिः स्वाहा । इति दीपं समर्पयेत् । ॐ अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः प्रप्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे । इति नैवेद्यम् । ॐ पूर्णादर्वि परापतसुपूर्णा पुनरापत वस्ने वविक्रीणावहाइषमूर्जं शतक्रतो । इति वस्त्रम् । ॐएतं ते देव सवितर्यज्ञं प्राबुर्बृहस्पतये ब्रह्मणे तेन यज्ञमवतेन यज्ञपतिं तेन मामव । इति प्रार्थना । ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञ ँ समिमं दधातु विश्वेदेवा स इह मादयंतामों प्रतिष्ठ । एष वै प्रतिष्ठा नाम यज्ञो यत्रैतेन यज्ञेन यजंते सर्वमेव प्रतिष्ठितं भवति । इति कलशान् स्थापयेत् ।

'ॐ धूरसि' से धूप, 'अग्निर्ज्योतिः' से दीप, 'अन्नपतेरन्नस्य' से नैवेद्य, पूर्णादर्वि, से वस्त्र, 'एतं ते देव' से प्रार्थना 'ॐ मनो जूतिर्जुषतामाज्यस्य' से प्राणप्रतिष्ठा करके कलशों का स्थापन करें ।

पूर्वस्यां दिशि स्थितं कलशं दुग्धोदकेन पूरयित्वा तस्योपरि ताम्रपात्रे—ॐप्रजापते नत्वदेतान्यन्ये विश्वारूपाणि परितो बभूव यत्कामास्ते जुहुमस्तन्नो अस्तु वय ँ स्यामपतयोरयीणाम् । इति मंत्रेण रौप्यमयीं मूर्तिं कलशोपरि संस्थाप्य, प्रतिज्ञासंकल्पः—ॐअद्यामुकगोत्रस्य पितुरमुकनाम्नोऽतिकुत्सितमृत्युजन्यदोषनिवारणार्थं सुगतिप्राप्त्यर्थं कर्त्तव्यनारायणबल्यंगभूतपूर्वस्यां दिशि गोधूमान्नोपरि वस्त्रद्वयाऽवेष्टितरौप्यमूर्त्तौ ब्रह्मपूजनमहं करिष्ये । आवाहनमंत्रः—ॐब्रह्मजज्ञानं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रथमं पुरस्ताद् विसीमतः सुरुचो वेन आवः सबुध्न्या उपमा अस्यविष्ठाः सतश्च योनिमसतश्च-विवः । इतिमंत्रेण षोडशोपचारैः पूजयेत् ।

पूर्व दिशा के कलश को दूध और जल से भर कर उसके ऊपर तामा के सराई में 'ॐप्रजापते नत्वदे-तान्यन्ये' इस मंत्र से चान्दी की मूर्ति को रखकर 'ॐ अद्यामुकगोत्रस्य' से प्रतिज्ञासंकल्प करें। तदुत्तर 'ॐ ब्रह्मजज्ञानं प्रथमं' से आवाहन करके षोडशोपचार से ब्रह्मा की पूजा करें।

ततः वरणसंभृतिमादाय ॐअद्यामुकगोत्रस्य पितुरमुकप्रेतस्य कुत्सितमृत्युजन्यदोषनिवारणार्थं सुगतिप्राप्त्यर्थं नारायणबलिकर्मणि ब्रह्मजज्ञानमिति मंत्रेण यथापरिमितं जपं कारयितुम् अमुक-गोत्रम् अमुकशर्माणं ब्राह्मणं जापकत्वेन त्वामहं वृणे । इति वृणुयात् । ततः पश्चिमदिशि स्थित कलशं गंगोदकेन पूरयित्वा ताम्रपात्रे सुवर्णमयमूर्त्तौ विष्णुपूजां कुर्यात् । तत्र मंत्रः—ॐविष्णोर-राटमसि विष्णोश्नप्त्रेस्थो विष्णोस्यूरसि विष्णोध्रुवोऽसि वैष्णवमसि विष्णवे त्वा । इत्यावाह्य ॐ अद्येत्यादि पूर्ववत् समुच्चार्य पश्चिमदिशि सोपकरणकलशोपरि सुवर्णमयमूर्त्तौ विष्णुपूजनमहं करिष्ये । ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पाᳪसुरे । इति मंत्रेण पीतवस्त्रेणा-वेष्ट्य षोडशोपचारैः पूजयेत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ब्रह्मपूजन के बाद वरण-सामग्री लेकर—'ॐ अद्यामुकगोत्रस्य' से ब्राह्मण को वरण दें। उसके बाद पश्चिम दिशा में स्थित कलश को गंगाजल से भरकर उसके ऊपर ताँबे की सराई में सोनेकी मूर्ति को रखकर उसपर 'ॐ विष्णोरराटमसि' से विष्णु का आवाहन करके 'ॐ अद्येत्यादि से पूर्ववत् संकल्प करें और 'इदं विष्णुर्विचक्रमे' इस मंत्र को पढ़ कर पीले वस्त्र से आवेष्टित करके षोडशोपचार से विष्णुपूजन करें।

ततः वरणसंभृतिमादाय ॐ अद्येत्यादि पूर्ववदुच्चार्य विष्णोरराटमसि इति मंत्रस्य यथापरिमितजपं कारयितुं एभिर्वरणद्रव्यैरमुकगोत्रममुकशर्माणं ब्राह्मणं जापकत्वेनाहं वृणे। इति उत्तरस्यां दिशि मधुघृतपूरितं कलशं स्थापयेत्। रुद्रं च पूजयेत्। अद्येत्याद्युक्त्वोत्तरदिशि सोपकरणकलशोपरि ताम्रपात्राधिकरणकताम्रमयमूर्तौ रुद्रपूजनमहं करिष्ये। ॐ इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहेमतीः यथा शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम्। इति संस्नाप्य रक्तवस्त्रेणावेष्ठ्य च। ॐ नमस्ते रुद्रमन्यव उतो त इषवे नमः बाहुभ्यामुत ते नमः। इति गन्धादिभिः पूजयेत्।

पुनः वरण सामग्री लेकर 'ॐअद्य' इत्यादि से ब्राह्मण को वरण देकर उत्तर दिशा में मधु और घृत से पूर्ण कलश की स्थापना करें। और कलश पर 'ॐ अद्य' इत्यादि से ताम्रपात्र में तामेकी शिवमूर्त्ति की स्थापना करके 'इमां रुद्राय'—शिवमूर्त्ति को स्नान कराकर रक्त वस्त्र से वेष्टित करें। तत्पश्चात् 'नमस्ते रुद्रमन्यव' मंत्र पढ़कर चन्दन आदि से शिव की षोडशोपचार से पूजा करें।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पं० श्री ... शास्त्री
जहांगीराबाद २०२३९४
बुलन्दशहर (उ० प्र०)

ततो वरणसंभारमादाय । ॐअद्येत्याद्युक्त्वा नमस्ते रुद्रेति मन्त्रस्य यथापरिमितजपरूपकर्म कारयितुमेभिर्वरणद्रव्यैरमुकगोत्रममुकशर्माणं ब्राह्मणं जापकत्वेन त्वामहं वृणे । इति दक्षिणस्यां दिशि स्थितं कलशं जलेन पूरयित्वा तस्योपरि ताम्रपात्रस्थितलोहमयमूर्ति संस्थाप्य तत्र यमपूजां कुर्यात्—ॐ यमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे देवस्त्वा सविता मध्वानक्तु पृथिव्याः सᳬंस्पृशस्पाहि अर्चिरसि शोचिरसि तपोसीत्यावाह्य ॐ अद्येत्याद्युक्त्वा दक्षिणस्यां दिशि कृष्ण-वस्त्रावेष्टितसजलमृन्मयकुम्भोपरि ताम्रपात्राधिकरणकलोहमयमूर्तौ यमपूजनमहं करिष्ये—ॐ यमाय त्वाङ्गिरसे पितृमते स्वाहा धर्माय स्वाहा धर्माय स्वाहा धर्मः पित्रे । इति मन्त्रेण गन्धादिभिरर्चयेत् ।

पुनःवरणसामग्री लेकर'ॐअद्य' इत्यादि मंत्र से ब्राह्मण को वरण देकर दक्षिण दिशा में जल-पूर्णकलश की स्थापना करके उसपर ताम्र-पात्र में लोहे की मूर्ति की स्थापना करे, तथा काले वस्त्र से उसे वेष्टित करके 'यमाय त्वा मखाय त्वा' से उसपर यम का आवाहन करके 'ॐ अद्य' इत्यादि से संकल्प करें। तत्पश्चात् 'यमाय त्वाङ्गिरसे' मन्त्र से चन्दन आदि से यम की षोडशोपचार से पूजा करें।

ततो वरणसंभारमादाय,ॐ अद्येत्याद्युक्त्वा यमायत्वेतिमंत्रस्य यथा परिमितं जपं कारयितु-ममुकगोत्रममुकशर्माणं ब्राह्मणं जापकत्वेन त्वामहं वृणे इति अपसव्यं कृत्वा मध्यकलशस्थित-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ताम्रपात्राधिकरणकसीसकमयः कौशेयवासाः प्रेतः पूज्यः—ॐ ये समानाः समनसा पितरो यमराज्ये तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पतामित्यावाह्य—ॐ अद्येत्याद्युक्त्वा मध्ये वस्त्रावेष्टित-सजलमृन्मयकुम्भोपरिस्थित-ताम्रपात्राधिकरणकसीसकमयमूर्तौ प्रेतपूजनमहं करिष्ये—ॐ ये समानाः समनसो जीवा जीवेषु मामकाः तेषाᳬंश्रीर्मयि कल्पतामस्मिँल्लोके शतᳬंसमाः ॥ १ ॥ ॐ यमाय त्वाऽङ्गिरसे इत्यादिमन्त्रेण च गन्धादिभिरर्च्चयेत् ।

पुनः वरण-सामग्री लेकर 'ॐअद्य' इत्यादि से ब्राह्मण को वरण देकर अपसव्य होकर मध्य कलश पर ताम्रपात्र में सीसा से निर्मित तथा काषाय वस्त्र से वेष्टित मूर्ति को रखकर 'ॐ ये समानाः' से उस पर प्रेत का आवाहन करें। 'ॐ अद्य' इत्यादि से संकल्प करके 'ये समानाः समनसो' इत्यादि मंत्र से प्रेत की षोडशोपचार से पूजा करें।

ततो वरणसंभारमादाय—ॐ अद्येत्याद्युक्त्वा यथापरिमितिगायत्रीजपरूपकर्म कारयितुमेभिर्वरणद्रव्यैरमुकगोत्रममुकशर्माणं ब्राह्मणं जापकत्वेन त्वामहं वृणे गृहीतवरणसंभृतयश्चैते पञ्च ब्राह्मणा यथोद्देशं जपं कुर्युरिति ।

पुनः वरण-समाग्री लेकर 'ॐ अद्य' इत्यादि से पाँच ब्राह्मणों को वरण दें और ब्राह्मण लोग स्थान पर जाकर जप करें।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ततः सव्यं कृत्वा ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्यौर्ध्वदैहिकसंप्रदानत्वयोग्यतासिद्धये एकादशेऽहनि विश्वादितर्पणमहं करिष्ये ॥ १ ॥ ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य प्रेतत्वविमुक्तिपूर्वकाक्षयस्वर्गलोकप्राप्तिकाम एकादशेऽहनि विश्वादितर्पणमहं करिष्ये ॥ २ ॥ ॐ युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः विहोत्रा दधे वपुना विदेक इन्मही देवस्य सवितुः परिष्टुतिस्तृप्यतामिति प्रतिमन्त्रमुच्चारणं कुर्यात् ॥१॥ ॐ देवी द्यावापृथिवी मखस्य वामद्य शिरो राध्यासन्देवयजने पृथिव्याः मखाय त्वा मखस्य त्वाशीर्ष्णे तृ०॥२॥ॐ देवो वम्प्रोभूतस्य प्रथमजा मखस्य त्वा वोऽद्य शिरोराध्या संदेवयजने पृथिव्याः मखाय त्वा मखस्य त्वा शीर्ष्णे तृ०॥३॥ॐ इत्यग्ना आसीत् मखस्पतयश्च शिरोराध्या संदेवयजने पृथिव्याः मखाय त्वा मखस्य त्वा शीर्ष्णेतृ० ॥४॥ॐ इन्द्रस्यौजस्य मखस्यवोऽद्य शिरोराध्या संदेवयजने पृथिव्याः मखाय त्वा मखस्य त्वा शीर्ष्णे तृ० ॥ ५ ॥ ॐ प्रैतु ब्रह्मणस्पतिः प्रदेव्येत सुनृता अच्छावीरं तर्पयन्ति राधसं देवायज्ञं न यं तनः । मखाय त्वा मखस्य त्वा शीर्ष्णे मखाय त्वा मखस्य त्वा शीर्ष्णे तृ० ॥६॥ ॐ मखस्य शिरोऽसि मखाय त्वा मखस्य त्वा शीर्ष्णे मखस्य शिरोऽसि मखाय त्वा मखस्य त्वा शीर्ष्णे मखस्य शिरोऽस्य मखाय त्वा मखस्य त्वा शीर्ष्णे मखाय त्वा मखस्य त्वा शीर्ष्णे मखाय त्वा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मखस्य त्वा शीर्ष्णे मखाय त्वा मखस्य त्वा शीर्ष्णे तृ० ॥ ७ ॥ ॐ अश्वस्य त्वा वृष्णः शक्ना धूपयामि, देवयजने पृथिव्याः मखाय त्वा मखस्य त्वा शीर्ष्णे अश्वस्य त्वा वृष्णः शक्ना यत्त्वा मखस्य त्वा शीर्ष्णे मखाधूपयामि, देवयजने पृथिव्याः मखाय त्वा मखस्य त्वा शीर्ष्णे मखाय त्वा मखस्य त्वा शीर्ष्णे मखाय त्वा मखस्य त्वा शीर्ष्णे तृ० ॥ ८ । ॐ दिवि विष्णुर्व्यक्रꣳस्तजागत्वेन छंदसा ततो निर्भक्तो योऽस्मान् द्वेष्टि यं च वयं द्विष्मोऽन्तरीक्षे विष्णुर्व्यक्रꣳस्तत्रैष्टुभेन छंदसा निर्भक्तो योऽस्मान् द्वेष्टि यं च वयं द्विष्मः पृथिव्यां विष्णुर्व्यक्रꣳस्ततगायत्रेण छंदसा ततो निर्भक्तो योऽस्मान् द्वेष्टि यं च वयं द्विष्मोऽस्मादन्नादस्यै प्रतिष्ठाया अगन्स्वः सज्योतिषा भूम तृ० ॥ ९ ॥ ॐ अग्नेस्तनूरसि विष्णवे त्वासोमस्य तनूरसि विष्णवे ता त्वित्थेगतिथ्यमसि विष्णवे तत्वा श्येनाय त्वा सोमभृते विष्णवे त्वागृये त्वा रायस्पोषदे विष्णवे त्वा तृ० ॥ १० ॥ ॐ विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे इन्द्रस्य युज्यः सखा त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः अतो धर्माणि अधारयन् तृप्यताम् ॥११॥ ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पाꣳसुरे स्वाहा ॥१२॥ ॐ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सरुचो वेन आवः स बुध्न्या उपमा अस्य विष्ठाः सतश्चयोनिमतसतश्च शिवः तृ० ॥१३॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ॐ यमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे देवस्त्वा सवित्वा मध्वा नक्तु पृथिव्याः सꣳस्पृशस्पा हि अर्चिरसि तपोऽसि तृ० ॥ १४ ॥ रुद्रतर्पणे विभ्राडित्यनुवाक्यम् ।

तब सव्य होकर 'ॐ अद्यामुकगोत्रस्य' इत्यादि मन्त्रों से संकल्प करके 'ॐ युञ्जन्ते मन उत' इत्यादि चौदहों मन्त्रों से यथाक्रम १४ वार तर्पण करें। 'तृप्यताम्' का उच्चारण प्रतिमन्त्र के अन्त में करें। (रुद्रतर्पण में 'विभ्राड्' इस पद को वाक्यों में जोड़े।

ततः प्रेतं मनसा ध्यात्वा पुरुषसूक्तेन तर्पणमपसव्येन ये समानाः समनस इति पितृतर्पणं कुर्यात् तर्पणस्यावसाने गां दद्यात् । तदभावे सुवर्णं दद्यात्—ॐ अद्य कृतैतद्विश्वादितर्पणसाङ्गता-सिद्ध्यर्थं दास्यमानां पयस्विनीधेनुसंज्ञिकां गां अथवा तन्मूल्योपकल्पितं द्रव्यं मनसोद्दिष्टममुक-गोत्रस्य प्रेतस्य हेतवे कस्मैचिद्ब्राह्मणाय मद्दत्ता तवोपतिष्ठताम् । ततो ब्राह्मणभोजनसङ्कल्पं कृत्वा सव्येन प्रार्थनां कुर्यात्–मन्त्रः-ॐ अतसीपुष्पसङ्काशं पीतवासं जनार्दनम् । योऽभ्यर्चयेत्तु गोविन्दं न तेषां विद्यते भयम् ॥ ॐ अनादिनिधनो देव ! शङ्खचक्रगदाधर । अक्षय पुण्डरीकाक्ष प्रेत-मोक्षप्रदो भव ॥

तब प्रेत का ध्यान करके पुरुषसूक्त से तर्पण करके अपसव्य होकर 'ये समानाः' से पितृतर्पण करें।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तर्पण के पश्चात् 'ॐ अद्य' इत्यादि से गोदान अथवा सुवर्णदान करके ब्राह्मण-भोजन का संकल्प करें और सव्य होकर 'ॐ अतसीपुष्पसंकाशं' इत्यादि मन्त्रों से प्रार्थना करें।

तत आचार्योऽग्निस्थापनं कुर्यात्। तत्र क्रमः—कुशैर्हस्तमात्रपरिमितचतुरस्रां भूमिं समूह्य तान् कुशानैशान्यां परित्यज्य गोमयोदकेनोपलिप्य स्रुवमूलेन प्रागग्रप्रादेशमात्रमुत्तरोत्तरक्रमेण त्रिरुल्लिख्योल्लेखनक्रमेणाऽनामिकांगुष्ठाभ्यां मृदमुद्धृत्य वारिणा तं देशमभ्युक्ष्य कांस्यपात्रेणाग्निमादाय तत्र प्रत्यङ्मुखं निदध्यात्।

तदुत्तर आचार्य अग्निस्थापन करें—कुशाओं से एक हाथ समतल भूमि को साफ करके उन कुशाओं को ईशान कोण में फेंककर अग्निस्थापन प्रदेश को गाय के गोबर और जल से लीप कर स्रुव की जड़ भाग से प्रादेश प्रमाण तीन रेखाओं को खींचकर तीनों रेखाओं की उखरी हुई मिट्टी को अनामिका और अंगुष्ठ दोनों अंगुलियों से निकालकर (तीनों रेखाओं को साफ कर) जल से सींच कर काँसे के पात्र में अग्नि को लेकर पश्चिमाभिमुख अग्नि की स्थापना करें।

ततः पुष्पचन्दनताम्बूलवासांस्यादाय—ॐ अद्य कर्त्तव्यनारायणबलिहोमकर्मणि कृताऽकृतावेक्षणरूपकर्म कर्तुममुकगोत्रममुकशर्माणंब्राह्मणमेभिःपुष्पचन्दनताम्बूलवासोभिर्ब्रह्मत्वेनत्वामहं वृणे। तथैवाचार्यं वृणुयात्, ॐवृतोऽस्मि। प्रतिवचनानन्तरम् ॐयथाविहितं कर्म कुरु इत्युक्ते करवाणि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इति प्रतिवचनम् ततोऽग्नेः शुद्धमासनं दत्त्वा तदुपरि प्रागग्रान् कुशानास्तीर्याग्निं प्रदक्षिणीकृत्य अस्मिन् कर्मणि त्वं मे ब्रह्माभवेत्यभिधाय ॐ भवानि-तेनोक्ते कल्पितासने तमुदङ्मुखमुपवेशयेत्

तब फूल, चन्दन, ताम्बूल तथा वस्त्र लेकर 'ॐ अद्य' इत्यादि से ब्रह्मा को वरण देकर 'ॐयथाविहितं कर्म कुरु' यह ब्रह्मा को कहें। तदुत्तर ब्रह्मा 'ॐ करवाणि' ऐसा कहें। तत्पश्चात् अग्नि के दक्षिण तरफ शुद्ध आसन रख कर उस पर पूर्वाग्र कुशाओं को बिछाकर ब्रह्मा का हाथ पकड़ कर 'ॐ अस्मिन् कर्मणि त्वं मे ब्रह्मा भव'। यह मन्त्र पढ़कर अग्नि की प्रदक्षिणा कराते हुए कल्पित आसन पर ब्रह्मा को बैठावें और ब्रह्मा 'ॐ भवानि' कह कर आसनपर बैठ जाँय।

ततः प्रणीतापात्रं पुरतः कृत्वा जलेनापूर्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्याऽग्नेरुत्तरतः कुशोपरि निदध्यात्। ततः परिस्तरणं बर्हिषश्चतुर्थभागमादायाऽग्नेयादीशानांतं ब्रह्मणोऽग्निपर्यन्तं नैर्ऋत्यात् वायव्यांतं अग्नितः प्रणीतापर्यन्तं परिस्तृणुयात्।

तदुत्तर प्रणीतापात्रको आगे में रख, जल से भर, कुशाओं से ढक कर ब्रह्मा के मुख को देखते हुए अग्नि के उत्तर तरफ कुशा के ऊपर रखें। तदुत्तर कुशमुष्टि (बर्हिष) से चतुर्थ भाग कुशा लेकर अग्नि से ईशान कोण पर्यन्त, ब्रह्मा से अग्नि पर्यन्त, नैर्ऋत्य से वायव्य कोण पर्यन्त, अग्नि से प्रणीतापर्यन्त परिस्तरण करें।

ततोऽग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयं,पवित्रकरणार्थं साग्रमनन्तर्गर्भं कुशपत्रद्वयं,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रोक्षणीपात्रम्, आज्यस्थालीं, सम्मार्जनार्थं कुशत्रयं, उपयमनार्थं वेणीरूपकुशत्रयं, समिधस्तिस्रः, श्रुवः, आज्यं, षट्पञ्चाशदुत्तराचार्यमुष्टिशतद्वयावच्छिन्नाऽऽमतण्डुलपूर्णपात्रम्, एतानि पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्रमेणासादनीयानि ।

तदुत्तर अग्नि के उत्तर तरफ पश्चिम दिशा में पवित्रच्छेदन के लिए तीन कुशा, पवित्र बनाने के लिये अग्रभाग सहित अन्तर्गर्भित कुशपत्रद्वय, प्रोक्षणीपात्र, घृतपात्र, सम्मार्जन कुशत्रय, वेणीरूप उपयमन के लिये कुशत्रय, तीन ठो समित्, स्रुव, घृत तथा आचार्य की मुट्ठी से २५६ मुट्ठी अरवा चावल से पूर्ण (ब्रह्मदक्षिणार्थ) पात्र को पवित्रच्छेदन कुशा से पूर्व दिशा में यथाक्रम से रखें।

अथ पवित्रच्छेदनकुशैः—पवित्रे छित्त्वा प्रणीतोदकं त्रिः सपवित्रकरेण प्रोक्षणीपात्रे निधायाऽनामिकांगुष्ठाभ्यां द्वाभ्यामुत्तराग्रे पवित्रे धृत्वा त्रिरुत्पूय प्रोक्षणीपात्रं वामहस्ते कृत्वा अनामिकांगुष्ठाभ्यां पवित्रे गृहीत्वा त्रिरुच्छिगनं प्रणीतोदकेन प्रोक्षणीप्रोक्षणं प्रोक्षणीजलेन यथाऽऽसादितवस्तुसेचनम् ।

तब पवित्रच्छेदन कुशाओं से कुशपत्रद्वय को काटकर पवित्र बनावें और उस पवित्र को हाथ में लेकर प्रणीतासे तीन बार जल ले-ले कर प्रोक्षणीपात्रमें रखें। तत्पश्चात् अनामिका और अङ्गुष्ठ दोनों अङ्गुलियों से उत्तराग्र पवित्रको पकड़ कर प्रोक्षणीपात्रके जल को तीन बार ऊपर फेंके। तदुत्तर प्रोक्षणीपात्रको बायें हाथ में

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding:IKS-MoE-Grant-2

रखकर अनामिका और अंगुष्ठ दोनों अंगुलियों से पवित्र को पकड़ कर प्रणीतापात्र के जल से प्रोक्षणपात्र को और प्रोक्षणीपात्र के जल से अग्नि के समीपस्थ हवन-सामग्री को सिद्ध करें।

ततोऽग्नेरुत्तरतः दक्षिणदिशि प्रोक्षणीपात्रं निधाय आज्यस्थाल्यामाज्यं निर्वाप्य प्रणीताजलं किंचिच्चरौ निधाय ज्वलत्तृणादिना स्रुवं प्रताप्य सम्मार्जनकुशानामग्रैरन्तरतो मूलैर्बाह्यतः स्रुवं सम्मृज्य प्रणीतोदकेनाऽभ्युक्ष्य पुनः स्रुवं प्रताप्य दक्षिणतो निदध्यात्। ततः प्रोक्षणीवत् आज्यस्योत्पवनम् अवेक्ष्य सत्यपद्रव्ये तन्निरसनं कृत्वा उपयमनकुशान् वामे हस्ते कृत्वा उत्थाय प्रजापतिं मनसा ध्यात्वा तूष्णीं घृताक्ताः तिस्रः समिधः क्षिपेत्। तत उपविश्य प्रोक्षणीजलेनाग्निं पर्युक्ष्य प्रणीतापात्रे पवित्रे धृत्वा ब्रह्मणान्वारब्धः पातितदक्षिणजानुः समिद्धतमेऽग्नौ जुहुयात्।

तत्राऽघारादारभ्याऽऽहुतिः तत्तदाहुत्यनन्तरं स्रुवाऽऽज्यस्य प्रोक्षणीपात्रे प्रक्षेपः॥

तब अग्नि के उत्तर तरफ दक्षिण दिशा में प्रोक्षणीपात्र को रखकर आज्यस्थाली में घृत को रखकर प्रणीता से थोड़ा जल लेकर चरु-पात्र में रखें। तदुत्तर प्रज्वलित तृण से स्रुव को तप्त करके संमार्जन कुशाओं के अग्रभाग से भीतर भाग को और जड़भाग से ऊपर भाग को झाड़कर प्रणीता के जल से सिक्त कर पुनः अग्निपर करके दक्षिण भाग में रख दें। तदुत्तर प्रोक्षणीपात्रस्थ जलवत् से पवित्र से तीन बार घृत को मस्तक पर प्रक्षेप करें ओर घृत में यदि कोई अपद्रव्य (अविहित वस्तु) हो तो उसे निकाल दें।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

